प्रगण्डी, स्त्री, ( प्रगण्ड+गौरादित्वात् ङीष् ) वहि:प्राकार:। दुर्गप्राकारभित्तौ शूराणां उपवेशनस्थानानि। ( यथा, महाभारते। १२। ६९। ४३।
"प्रगण्डी: कारयेत् सम्यगाकाशजननीस्तदा॥")

प्रगतजानु:, त्रि, ( प्रगते संश्लिष्टे जानुनी यस्य। ) प्रगतजानुक:। इत्यमरटीकायां रमानाथ:॥

प्रगतजानुक:, त्रि, ( प्रगते जानुनी यस्य। कप्।) यस्य जानुनोर्म्मध्ये नित्यं कादाचित्कं वा महदन्तरालं स:। पाफाराक् यक्ति इति भाषा॥ तत्पर्य्याय:। प्रज्ञु: २। इत्यमर:। २। ६। ४७॥ प्रज्ञ: ३ प्रगतजानु: ४। इति भरत:॥

प्रगन्ध:, पुं, ( प्रकृष्टो गन्धो यस्य। ) पर्पट:। इति राजनिर्घण्ट:॥

प्रगल्भ:, त्रि, (प्रगल्भते इति। प्र+गल्भ धार्ष्ट्ये+पचाद्यच्।) प्रत्युत्पन्नमति:। तत्पर्य्याय:। प्रतिभान्वित: २। इत्यमर:। ३। १। २५॥ ( यथा, महाभारते। १२। ६८। ५८।
"प्रज्ञा प्रगल्भं कुरुते मनुष्यं
राजा कृशान् वै कुरुते मनुष्यान्॥")

प्रगल्भता, स्त्री, प्रगल्भस्य भाव:। (प्रगल्भ+तल्।) प्रागल्भ्यम्। तत्पर्य्याय:। उत्साह: २ अभियोग: ३ उद्यम: ४ प्रौढ़ि: ५ उद्योग: ६ कियदेतिका ७ अध्यवसाय: ८ ऊर्ज्ज: ९। इति हेमचन्द्र:। २। २१३॥ तस्य लक्षणम्। यथा,
"नि:शङ्कत्वं प्रयोगेषु बुधैरुक्ता प्रगल्भता॥"
इत्युज्ज्वलनीलमणि:॥
( यथा, कुमारे। ६। ३२।
"आर्य्याप्यरुन्धती तत्र व्यापारं कर्त्तुमर्हति।
प्रायेणैवंविधे कार्य्ये पुरन्ध्रीणां प्रगल्भता॥" )

प्रगल्भा, स्त्री, ( प्रगल्भते धृष्टा भवतीति। प्र+गल्भ धार्ष्ट्ये+पचादित्वादच्। ततष्टाप्।) नायिकाभेद:। अस्या लक्षणम्। पतिमात्रविषयकेलिकलापकोविदा। अस्याश्चेष्टा रतिप्रीति:। आनन्दादात्मसंमोह:। रतिप्रीतिर्यथा,—
"संसृष्ट स्तनमाकलय्य वदनं संश्लिष्य कण्ठस्थलं
निष्पीयाधरविम्बमम्बरमपाकृष्य व्युदस्यालकम्।
देवस्याम्बुजिनीपते: समुदयं जिज्ञासमाने प्रिये
वामाक्षी वसनाञ्चलै: श्रवणयोर्नीलोत्पलं
निह्नुते॥"
आनन्दादात्मसंमोहो यथा,—
"नखाङ्कितमुर:स्थलेऽधरतले रदस्य क्षतं
च्युता वकुलमालिका विगलिता च मुक्तावली।
रतान्तसमये मया सकलमेतदालोचितं
स्मृति: क्व च मति: क्व च क्व च तवालिङ्गिताविधि:॥"
सा मानावस्थायां त्रिविधा। धीरा अधीरा धीराधीरा च। व्यङ्ग्यकोपप्रकाशा धीरा। अव्यङ्ग्यकोपप्रकाशा अधीरा। व्यङ्ग्याव्यङ्ग्यकोपप्रकाशा धीराधीरा। प्रौढ़ाधीरायास्तु रतावौदास्यम्। अधीरायास्तर्ज्जनताड़नादि। धीराधीराया रतावौदास्यं तर्ज्जनादि च कोपस्य प्रकाशकम्। प्रौढ़ाधीरा यथा,—
"नो तल्पं भजसे न जल्पसि सुधाधारानुकारा गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाशच्छलात्।
इत्थं केतकगर्भगौरि दयिते कोपस्य संगोपनं
किं स्यादेव नचेत् पुन: सहचरी कुर्व्वीत साचिस्मितम्॥"
प्रगल्भा अधीरा यथा,—
"प्रतिफलमवलोक्य स्वीयमिन्दो: कलायां
हरशिरसि परस्या वासमाशङ्कमाना।
गिरिशमचलकन्या तर्ज्जयामास कम्प
प्रचलवलयवेल्लत्कान्तिभाजा करेण॥"
प्रगल्भा धीराधीरा यथा,—
"तल्पोपान्तमुपेयुषि प्रियतमे साचीकृतग्रीवया
काक्वाकुलवाचि साचिहसितस्फूर्ज्जत्कपोलश्रिया।
हस्तन्यस्तकरे पुनर्मृगदृशा लाक्षारसक्षालितप्रोष्ठीपृष्ठमयूखमांसलरुचो विस्फारिता दृष्टय:॥"
इति रसमञ्जरी॥
( तल्लक्षणञ्च यथा साहित्यदर्पणे। ३। १०१।
"स्मरान्धा गाढ़तारुण्या समस्तरतकोविदा।
भावोन्नता दरव्रीड़ा प्रगल्भाक्रान्तनायका॥"
तस्या उदाहरणभेदादिकं तत्रैव विशेषतो द्रष्टव्यम्॥ )

प्रगाढ़ं, त्रि, ( प्रकर्षेण गाह्यते स्मेति। प्र+गाह+क्त:। "यस्य विभाषा।" ७। २। १५। इति न इट्।) भृशम्। कृच्छ्रम्। इत्यमर:। ३। ३। ४४॥ ( यथा, महाभारते। ४।५९। २६।
"अहमिन्द्राद्दृढ़ां मुष्टिं ब्रह्मण: कृतहस्तताम्।
प्रगाढे तुमुलं चित्रमभ्यशिक्षं प्रजापते:॥")
दृढ़म्। इति भरत:॥ ( यथा, महाभारते। ७। ९७। ४८।
"तत्रान्तरीक्षे बाणानां प्रगाढ़ानां विशाम्पते।
संघर्षेण महार्च्चिष्मान् पावक: समजायत॥" )
घनम्। यथा, सुश्रुते चिकित्सितस्थाने ५ अ:।
"तूणीप्रतूण्यो: स्नेहलवणमुदकेन पाययेत्
पिप्पल्यादिचूर्णं वा हिङ्गुयवक्षारप्रगाढ़ं सर्पिर्वर्त्तिभिश्चैनमुपक्रमेत्॥" )

प्रगाता, [ ऋ ] त्रि, ( प्र+गै+तृच्।) उत्तमगायक:। इति शब्दरत्नावली॥ ( यथा, महाभारते। ३। २३९। ८।
"ततो गोपा: प्रगातार: कुशला नृत्यवादिते।
धार्त्तराष्ट्रमुपातिष्ठन् कन्याश्चैव स्वलङ्कृता:॥")

प्रगुण:, त्रि, ( प्रकर्षेण गुणो यत्र।) ऋजु:। इत्यमर: ।३। १। ७२॥ (प्रकृष्टगुणवति, त्रि। यथा, रघौ। ९। ४९।
"परिचयं चललक्ष्यनिपातने
भयरुषोश्च तदिङ्गितबोधनम्।
श्रमजयात् प्रगुणाञ्च करोत्यसौ
तनुमतोऽनुमत: सचिवैर्ययौ॥")

प्रगृह्यं, त्रि, (प्रगृह्यते इति। प्र+ग्रह+"पदास्वैरिबाह्यापक्ष्येषु च।" ३।१। ११९। इति क्यप्। "ग्रहिज्येति। ६। १। १६। इति सम्प्रसारणम्।) सन्धिरहितं पदम्। इति मुग्धबोधव्याकरणम्॥ पदपञ्चमरतन्त्रवद्भिर्भूतेषु गृह्यपदं निपात्यते। यथा, प्रगृह्यं पदं यत् स्वरेण न समुन्नीयते। इति दुर्गादास:॥ "आप्रगृह्य: स्मृतौ वाक्य।" इत्यमर:॥ प्रगृह्य: पाणिन्यादिकृतप्रगृह्यसंज्ञो ङानुबन्धरहित: आशब्द: योऽचा न सन्धीयते स इत्यर्थ:। स्मृतौ स्मरणे यथा। आ ज्ञातं स जटायुरेष:। वाक्ये यथा। आ एवं मन्यसे। इति भरत:॥

प्रगे, अ, ( प्रकर्षेण गीततेऽत्रेति। प्र+गै+के।) प्रात:। इत्यमर:। ३। ४। १९॥ ( यथा, माघे। १२। १।
"इत्थं रथाश्वेभनिषादिनाम्प्रगे
गणो नृपाणामथ तोरणाद्बहि:।
प्रस्थानकालक्षमवेशकल्पना
कृतक्षणक्षेपमुदैक्षताच्युतम्॥")

प्रगेतन:, त्रि, ( प्रगे प्रातर्भव इति। प्रगे+"सायंचिरमिति।" ४। ३। २३। इति ट्यु तुट् च।) प्रगे भव:। प्रातर्भव:। तत्पर्य्याय:। श्वस्तन: २। इति राजनिर्घण्ट:॥

प्रग्रह:, पुं, ( प्रगृह्यते इति प्रगृह्णात्यनेनेति वा। प्र+ग्रह+"प्रे वणिजाम्।" ३।३।५२। "रश्मौ च।" ३। ३। ५३। इति घञभावपक्षे "ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप।) तुलासूत्रम्। अश्वादिरश्मि:। वन्दी। इत्यमर:। ३। ३। २३६॥ नियमनम्॥ ( यथा, महाभारते। ३। १७९। १६।
"नहि मे मुच्यते कश्चित् कथञ्चित् प्रग्रहं गत:।
गजो वा महिषो वापि षष्ठे काले नरोत्तम!॥")
भुज:। रश्मि:। ( यथा, गोलाध्याये। ८।
"इन्दो: प्राच्यां भवति तरणे: प्रग्रह: किं प्रतीच्याम्॥" )
सुवर्णालुमहीरुह:। इति मेदिनी॥ कर्णिकारवृक्ष:। इति राजनिर्घण्ट:॥ (तत्पर्य्यायो यथा,
"आरेवतो राजवृक्ष: प्रग्रहश्चतुरङ्गुल:।
आरग्वधोऽथ सम्पाक: कृतमाल: सुवर्णक:॥"
इति वैद्यकरत्नमालायाम्॥
प्र+ग्रह+भावे अप्। इन्द्रियादीनां निग्रह:। यथा, हरिवंशे भविष्यपर्व्वणि। ८। ७८।
"अर्थो हि केवलं तस्य प्रग्रहो बाह्यगोचर:।
तस्मात् सर्व्वप्रयत्नेन चित्तं रक्ष जनार्द्दन!॥"
धारणम्। यथा, हरिवंशे भविष्यपर्व्वणि २२। ४।
"उद्धवोऽथ महाबुद्धिरुग्रसेनो महाबल:।
अन्ये च यादवा: सर्व्वे कवचप्रग्रहे रता:॥"
अवलम्बनम्। यथा, हरिवंशे। ४१। १९९।
"नृपेष्वथ प्रनष्टेषु जगत्यप्रग्रहा: प्रजा:।
क्षणेन निर्वृते चैवं हत्वा चान्योन्यमाहवे॥
परस्परहृतस्वाश्च निराक्रन्दा: सुदु:खिता:।